This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M793 विषय ધર્મશાસ્ત્ર
नाव. આચાર પ્રશંસા વિધી (Mss)
लेखक/लिपीकार –
पृष्ठ 14 काळ – [✓ पूर्ण]/अपूर्ण

श्रीगणेशाय नमः ॥ अथातो हिमशैलाग्रे देवदारुवनाकु
ले ॥ व्यासमेकाग्रमासीनं ऋषिः पृछति धार्मिकं ॥१॥

दुराचारो हि पुरुषो लोके भवति निंदितः ॥ दुःखभागी च सततं व्याधितोल्पायुरेव च ॥ परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ॥ धर्मं चाप्यसुखोदर्कं लोकविद्विष्टमेव च ॥ लोकविद्विष्टं यथा मधुपर्के गवालंभादिः ॥ उथ्यायास्त्रापबाढव्यं किमपदासु कृतं कृतं ॥ दत्तं वादापितं वापि वा कैसत्या बाधि भाषितं ॥ इति उपाध्याय श्रीनादेव विरचिते आचारदीपे आचारप्रशंसाविधिः ॥ तत्र स्मृत्यंतरं ॥ उपपातकेषु सर्वेषु पातकेषु महत्स्वपि ॥ प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत् ॥ याज्ञवल्क्यः ॥ उक्तस्त्रोत्तानचरणस्य आस्तथा गार्ग्यो गौतमश्चैव तथा गोपालकश्यपः ॥ आत्रेयविष्णुसांवर्त्तदाक्षायांगिरसस्तथा ॥ शातातपश्च हारीतो याज्ञवल्क्यकृ॰ताश्च ये ॥१५॥ आपस्तंबकृता धर्माः शंखस्य लिखितस्य च ॥ धर्मराजकृताश्चैव बृहस्पतिकृताश्च ये ॥ कात्यायनकृताश्चैव प्राचेतसकृतास्तथा ॥ श्रुतिरात्रेयदेवेन तत्त्वार्था मानवास्तथा ॥१६॥ मन्वर्थे सर्वधर्माणां कृते त्रेतासु द्वापरे ॥ धर्मयुगत्रयाचारं नरी क्ष्ये २ तु कलौ युगे ॥ चातुर्वर्णस्य या वृत्तिः किंचित्साधारणा वद ॥ व्यासवाक्यावसाने तु मुनिमुख्यपराशरः ॥१७॥ अवादीन्निर्णयं धर्मे तस्मात्स्थूलवि

त्तरं ॥१८॥ [illegible] ॥१९॥ कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः ॥ श्रुतिस्मृतिसदाचारं ध्यायंते प्रभवंति च ॥२०॥ न केचिद्वेदकर्तारो वेदस्मर्ता चतुर्मुखः ॥ तथैव धर्मस्मृतिं मनुः कल्पांतरांतरे ॥२१॥ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ॥ अन्ये कलियुगे नृणां युगरूपानुरूपतः ॥२२॥ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥ द्वापरे यज्ञमित्याहुर्दानमेकं कलौ युगे ॥२३॥ कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ॥ द्वापरे शंखलिखिताः कलौ पाराशराः स्मृताः ॥२४॥ त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ द्वापरे कुलमेकं स्यात्कर्त्तारं च कलौ युगे ॥२५॥ कृते संभाषणात्पापं त्रेतायां स्पर्शनाद्भवेत् ॥ द्वापरे चान्नमादाय कलौ पतति कर्मणा ॥२६॥ कृते तात्कालिकः शापः त्रेतायां दशभिर्दिनैः ॥ द्वापरे मासमात्रेण कलौ संवत्सरेण तु ॥२७॥ अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ॥ द्वापरे याच्यमानं स्यात्कलौ दानं च मेवयः ॥२८॥ अभिगम्योत्तमं दानं आहूतं चैव मध्यमं ॥ अधमं याच्यमानं स्यात्सेवादानं तु निःफलं ॥२९॥ कृते चास्थिगताः प्राणास्त्रेतायां मांससंस्थिताः ॥ द्वापरे रुधिरं यावत्कलौ त्वन्नाद्यमेव च ॥ धर्मो जितो ह्यधर्मेण जितः सत्यानृते

२ नकृ ॥ जिताग्न्यो स्को नाज्ञानस्त्रीभिस्कृपुरुषाजिता ॥ सादंति चाग्नि
होत्राणि गुरुपूजा प्रणश्यति ॥ कुमार्यश्च प्रसूयंते यस्मिन्न कलियु
गे सदा ॥ युगे युगे तु ये धर्मा तेषु तेषु तथा द्विजः ॥ तेषां निंदा न कर्त्त
व्या युगरूपा हि ब्राह्मणः ॥ युगे युगे तु सामर्थ्यं शेषं मुनिवि
भाषितं ॥ पाराशरेन तथा प्रोक्तं प्रायश्चित्तं प्रदीयते ॥ अह
मवं तु यद्धर्माननुस्मृत्य ब्रवीमि तान् ॥ चातुर्वर्ण्यं समारा
ध्यातु शृणुध्वं मुनिपुंगवाः ॥ पाराशरमतं पुण्यं पवित्रं
पापनाशनं ॥ चिंतितं ब्राह्मणार्थाय धर्मसंस्थापनाय
च ॥ चातुर्णामपि वर्णानां आचारो धर्मपालनं ॥ आचा
रभ्रष्टदेहानां भवेद्धर्मपराङ्मुखः ॥ षट्कर्मानिरतो नि
त्यं देवतातिथिपूजकः ॥ हुतशेषं तु भुंजानो ब्राह्मणो ना
वसीदति ॥ संध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनं ॥

वैश्वदेवातिथेयं च षट्कर्माणि दिने दिने ॥ ३९ ॥ प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा ॥
वैश्वदेवे तु संप्राप्ते सोऽतिथिः स्वर्गसंक्रमः ॥ ४० ॥ दूरस्थानं पथः श्रांतं वैश्वदेवमु
पस्थितं ॥ अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ॥ ४१ ॥ न पृच्छेत् गोत्रचर
णं न स्वाध्यायं व्रतानि च ॥ हृदयं कल्पयेत्तस्मिन् सर्वदेवमयो हि सः ॥ ४२ ॥ नैकग्रा
मीणमतिथिं विप्रं सांगतिकं तथा ॥ अनित्यं ह्यागतो यस्मात्तस्मादतिथिरुच्यते ॥
४३ ॥ अपूर्वः सुव्रती विप्रो अपूर्वश्चातिथिस्तथा ॥ वेदाभ्यासरतो नित्यं त्रयोऽपूर्वा दि
ने दिने ॥ ४४ ॥ वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते ॥ उद्धृत्य वैश्वदेवार्थं भिक्षुकं तं वि
सर्जयेत् ॥ ४५ ॥ यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलं ॥ तद्भैक्षं मेरुतुल्यं वै तज्ज
लं सागरोपमं ॥ ४६ ॥ वैश्वदेवकृतान्दोषान् शक्तो भिक्षुर्व्यपोहितुं ॥ नहि भिक्षुक
कृतान्दोषान्वैश्वदेवं व्यपोहति ॥ ४७ ॥ अकृत्वा वैश्वदेवार्थं ये भुंजंति द्विजातयः ॥
तेषामन्नेन भुंजानः काकयोनिं व्रजंति ते ॥ ४८ ॥ शिरो वेष्ट्य तु यो भुंक्ते यो भुंक्ते दक्षि
णामुखः ॥ वामपादे करं न्यस्य तद्वै रक्षांसि भुंजते ॥ ४९ ॥ यतये कांचनं द[illegible] तां
बूलं ब्रह्मचारिणे ॥ चौरेभ्योऽप्यभयं दत्वा दातापि नरकं व्रजेत् ॥ ५० ॥ चौरो वाय

दिव्यां डालः शस्त्रवापितृघातकः ॥ वैश्वदेवकृते प्राप्ते सोतिथिः स्वर्गसंक्रमात् ॥ ५३ ॥ का
ष्ठभारसहस्राणि घृतकुंभशतानि च ॥ अतिथिर्यस्य भग्नाशस्तस्य होमा निरर्थकाः ॥
॥ ५४ ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ पितरस्तस्य नाश्नंति दशवर्षाणि पं
च च ॥ न पृच्छेत्कुलं विद्यां वा ह्यतिथिं वेदपारगं ॥ अदत्वा नावमात्रैः पुंवालकैर्नकुकिल्बि
षं ॥ ब्राह्मणस्य मुखं क्षेत्रं ब्राह्मणस्य मुखक्षेत्रं निरूषरमकंटकं ॥ वापयेत्स
र्वबीजानि सा कृषिः सर्वकामिका ॥ सुक्षेत्रे वापयेद्बीजं सत्पात्रे दीयते धनं ॥ सुक्षेत्रे सु ध्यं च
पात्रेण अक्षितं नैव नश्यति ॥ न स्त्रीः कुलक्रमायाता भर्ता नो लिखिता पिता ॥ खड्ग
नाकृष्य भुंजीत वीरभोग्या वसुंधरा ॥ पुष्पं पुष्पं विचिन्वीत मूलछेदं न कार
येत् ॥ मालाकार इवोद्याने न यथांगारकारकः ॥ लोहकमं तथा रक्षं वंगवा
च पतिपालनं ॥ वाणिज्यं कृषिकर्मापि वैश्यवृत्तिः सदा कृता ॥ शूद्राणां द्वि
जशुश्रूषा परमं धर्मकीर्तितं ॥ अन्यथा कुरुते किंचित्तद्भवेत्तस्य निःफ
लं ॥ लवणं मधु तैलं च दधि शाकं घृतं पयः ॥ न दुष्येच्छूद्रजातीनां कुर्यात्सर्व

त्र विक्रयं ॥ अविक्रयं मद्यमांसस्य अभक्ष्यस्य च भक्षणं ॥ अगम्यागमनं
चैव शूद्रः पतितपंचधा ॥ कपिलाक्षीरपानेन ब्राह्मणीगमनेन वा ॥ वेदाक्ष
रविचारेण शूद्रस्य नरकं ध्रुवं ॥ ६४ ॥ इति श्रीपाराशरधर्मशास्त्रे कलि
युगे चातुर्वर्ण्यविचारकथनं नाम प्रथमोध्यायः ॥ १ ॥ अतः परं गृहस्थ
स्य धर्मचारं कलौ युगे ॥ धर्मसाधारणं शक्यं चातुर्वर्ण्याश्रमागतं ॥ क्षु
धितं तृषितं श्रांतं बलीवर्दं न योजयेत् ॥ हीनांगं व्याधितं क्लीबं वृषं विप्रो
न वाहयेत् ॥ आगुकं संप्रवक्ष्यामि पाराशरप्रनोदितं ॥ षट्कर्मनिरतो विप्रः
कृषिकर्म च कारयेत् ॥ स्थिरांगं नीरुजं तृप्तं मनडुं नृषंढवर्जितं ॥ वाह
येद्दिवसस्यार्द्धं पश्चात्स्नानं समाचरेत् ॥ जपं देवार्चनं होमं संध्यायो
गं समभ्यसेत् ॥ एकद्वित्रिचतुर्विप्रान् भोजयेत्स्नातकान् द्विजान् ॥ स्व
यं कृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः ॥ निर्वपेत्पंच यज्ञानि क्रतुदीक्षां
च कारयेत् ॥ तिलान् रसान् न विक्रीत विक्रेयद्धान्यतत्समं ॥ विप्रस्य
द्विधा वृत्तिस्तृणकाष्ठांश्च विक्रयेत् ॥ संवत्सरेण यत्पापं मत्स्यघाती स

५

माप्नुयात्॥ एकाहेन तदाप्नोति सकृच्छिन्नेन लांगली॥ पाशको मत्स्य
वधकः व्याधः शकुनिकस्तथा॥ अदाता कर्षकश्चैव पंचैते समक
र्मिणः॥ कंडनी पेषणी चुल्ली उदकुंभोथ मार्जनी॥ पंचसूना गृहस्थ
स्य अहन्यहनि वर्त्तते॥ वृक्षं छित्वा महीं भित्वा हत्वा तु क्रिमिकी
टकान्॥ कृषिःश्च खलयज्ञेन न किंचित्पापात्प्रमुच्यते॥ यो न दद्या
द्द्विजातिभ्यो राशीमूलमुपागते॥ स चोरः स च पापिष्ठो ब्रह्मघ्नं
तं विनिर्दिशेत्॥ राज्ञे दत्वा तु षड्भागं देवतानां तु विंशतिं॥ त्रयस्त्रिं
शत्तु विप्राणां कृषिकर्त्ता न लिप्यते॥ क्षत्रियोपि कृषिं कुर्यात् द्वि
जां देवांश्च पूजयेत्॥ वैश्यशूद्रो सदा कुर्यात् कृषिवाणिज्यशि
ल्पिकान्॥ विकर्म कुर्वते शूद्रा द्विजसेवाविवर्जिताः॥ भ
वंत्यल्पायुषस्ते वै पतंति नरकेषु च॥ चतुर्णामपि वर्णानां सेव धर्मस
नातनं॥ ततः शुद्धिं प्रवक्ष्यामि जन्ममरणेषु च॥ दशाहेन तु शुद्ध्येत्

५

ते
द्वादशाहेन
क्षत्रिया॥
वैश्य पंच
दशाहेन
४

ब्राह्मणाः प्रेतसूतके॥ क्षत्रियो द्वादशाहेन शुध्येन प्रेतसूतके॥ वैश्य पंच
दशाहेन शुध्यते प्रेतके॥ मासेनैकेन शूद्रस्य शुध्यते प्रेतसूतके॥ उपवा
सेन विप्राणामग्निशुद्धिः प्रजायते॥ ब्राह्मणानां प्रसादेन अग्निस्पर्शो विधी
यते॥ जन्मो विप्रो दशाहेन शूद्रो मासेन शुध्यति॥ एकाहात् शुध्यते विप्रो योग्नि
वेदसमन्वितः॥ त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः॥ जन्मकर्म
परिभ्रष्टः संध्योपासनवर्जितः॥ नामधारण विप्रस्य दशाहं सूतकं
भवेत्॥ अजातानामहिष्य[illegible] ब्राह्मणानां च सूतकी॥ दशरात्रेण शु
ध्येत भूमिस्थं च न वोदकं॥ एकपिंडास्तु दायादाः पृथग्दारनिकेतनाः॥
जन्मनाशे च विपत्तौ च भवेत्तेषां च सूतकं॥ यावत्तु सूतकं गोत्रे च
तुर्थपुरुषेण तु॥ दायाद्विच्छेदमाप्नोति पंचमेनात्मवंशजे॥ चतु
र्थे दशरात्रं स्यात् षण्णिशां पुंसि पंचमे॥ षष्ठा चतुरहाच्छुद्धिः सप्तमेन दिनत्रयं॥

पंचभिः पुरुषैर्युक्ता आश्राद्धया स्वगोत्रिणः॥ परतः षट्पुरुषा द्याः आद्
स्तोऽप्याः स्वगोत्रियणः॥ गुरग्निश्शेभिवज्येषु दर्शांतरमृतेषु च॥ बा
लप्रेते च संन्यासे सद्यं शौचं विधीयते॥ देशांतरे मृतेके॥ श्रुत
त्वा तु श्रूयते यदि॥ नत्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भ
वेत्॥ यत्रिपक्ष मंत्रिरात्रस्यात्पाण्मासात्स्वपक्षिणी॥ अहः संवत्स
रादर्वाक् सद्यःशौचं विधीयते॥ अजातदंतये बालाये च गर्भाद्धि नि
ष्टतः॥ न तेषामग्निसंस्कारो नाशौचं नोदकं क्रिया॥ यदि गर्भो
विपद्येत स्रवते चापि योषितां॥ यावन्मासं स्थितो गर्भो दिनानि ता
वत्सूतकं॥ आचतुर्थो भवेत्स्रावः पातः पंचमषष्ठयोः॥ अत
ऊर्ध्वं प्रसूतिस्यादशाहं सूतकं भवेत्॥ प्रसूतिकाले संप्राप्ते अमले

यदि योषितां॥ जानप्रथ्ये तु गोत्रस्य मृते मातुश्च सूतकं॥ रात्रौ वैवस
मुत्थैं न मृते रजस्सि सूतके॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते
रविः॥ अस्तंगते यदा सूर्ये या च नारी रजस्वला॥ जन्मतो व
विपत्तौ च यस्याद्धस्तस्य सर्वशः॥ अर्द्धरात्रावधी कालः सूतकादौ
विधीयते॥ उपसः आग्रजन्मस्त्रीणां विज्ञेयं पूर्वकं दिनं॥ दंतजा
तांश्च कृतचूडेन कर्मणि॥ अग्निसंस्कारये तेषां त्रिरात्रं सूतकं
भवेत्॥ आदंतजननात्सद्यः आचूडान्नैशिकं स्मृतं॥ त्रिरा
त्रमव्रतादेशाद्दशरात्रमतः परं॥ गर्भे यदि विपत्तिस्याद्दशाहं
सूतकं भवेत्॥ जीवंजाते यदि प्रेयात् सद्य एव विशुध्यति॥
स्त्रीणां कृता तथाहानात् संस्कारादृथ्यधःक्रमात्॥ सद्यःशौचम

ष्येकाहं त्र्यहास्यात्सिरत्वं गुरु॥ ब्रह्मचारी गृही यत्र दृश्यते चंडुताग्र
न॥ संपर्कं नैव कुर्वीत न तेषां सूतकं भवेत्॥ ब्रह्मघोषे गृही य
त्र दृश्यते चंडुताशनः॥ संपर्के पुच कर्तव्ये भवेत्तेषां च सूत
कं॥ संपर्काद्दुष्यते विप्रो जन्मना मरणे पुच॥ संपर्के पुनि
वृत्तानां न प्रेत नैव सूतकं॥ शिल्पिनः कारुकाश्चैव दासी दासा
दासा नयस्तथा॥ राजानः श्रोत्रियश्चैव सद्यः शौचाः प्रकी
र्तिताः॥ सव्रती मंत्रपूतश्च आहिताग्निश्च यो द्विजः॥
राष्ट्रस्य सूतकं नास्ति यस्य चेच्छंति द्विजा वय॥ प्रसवे गृ
हमेधीनां न कुर्यात्संकरं द्विजः॥ दशाहं शुध्यते मा
ता अवगाह्य पिता शुचिः॥ पत्नीप्रसविता यस्य संपर्के

पुष्यते द्विजः॥ सूतकं तु भवेत्तस्य यदि विप्रः षडं
गवित्॥ संपर्काज्जायते दोषो नान्यो दोषोस्ति ब्रा
ह्मणे॥ तस्मात्सर्वप्रयत्नेन संपर्कं वर्जये द्विजः॥
शावसूतकमुत्पन्ने सूतकं तु भवेत्सवः॥ शावेन
शुध्यते सूति नाश्रुत्या शुध्यते शावः॥ सूती भव
ति सूति स्यात् शावेन शावयास्तह॥ गुरुणा लघुश्चैतेन
न लघुर्गुरु शुध्यति॥ सर्वेषां शावमाशौचं माता
पित्रोस्तु सूतकं॥ सूतकं मातुरेव स्यादुपस्पृश्य

पिताशुचि॥ विवाहेषु च यज्ञेषु अंतरामृतसूतके
॥ पूर्वसंकल्पितं नैव नोज्ञीतं मनुरब्रवीत्॥ अनं
तरं दशाहेन पुनर्मरणजन्मनां॥ तावत्स्यादशुचि
र्विप्रो यावत्तस्य न निष्कृतिः॥ उपाध्यायमथ विज्ञा
तसूतकं नैव दोषकृत्॥ एकेन वापरिज्ञाते भोक्ता
दोषमुपावहे॥ उच्यते नियमेदानं आर्त्तो विप्रो निवे
दयेत्॥ तथैव ऋषिणा दृष्टं यथाकालेन शुध्य
ति॥ मृन्मयेषु च पात्रेषु तिलमिश्रैर्यवैः सह॥
मृत्तिकावह्नितृणरत्ना चापीवाशुचिर्भवेत्॥

ब्राह्मणार्थे विपंन्नाये नारीणां गोग्रहेषु च॥ आहवेषु विपंन्ना
नांमेकरात्रमशौचकं॥ यत्र यत्र हतः शूरः शत्रुभिः परिवे
ष्टितः॥ अक्षयाल्लभते लोकान्यदि क्लीबं न भाषते॥ रण
यपत्रितं नार्थं त्यक्त्वा याति पराङ्मुखाः॥ पदे पदे निय
तस्य ब्रह्महत्याभिजायते॥ जिते च लभते लक्ष्मीं मृते चा
पि सुरांगणां॥ क्षणे विध्वंसिनि कायां कां चिंता मरणे
रणे॥ परिव्राड्योगयुक्तश्च रणे चापि मुखो हतः॥ द्वा
वेतौ पुरुषौ लोके सूर्यमंडलभेदिनौ॥ ललाटदेशे रुधि
रं स्रुपस्य ब्रवाहेश्च प्रविशेच्च वक्त्रकं॥ तत्सोमपानं किल
तस्य तुल्यं संग्राम यज्ञो च विधिः समानः॥ ८२॥ सत्य

सत्यसंधद्विजं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः॥ एष मे मंड
लं भीत्वा परं ब्रह्म निगच्छति॥ अनाथं ब्राह्मणं प्रेतं ये वहंति
द्विजातयः॥ पदे पदे यज्ञफलं मानुपूर्वं लभंति ते॥ असगोत्र
मसंबंधं प्रेतीभूतं च ब्राह्मणं॥ वहित्वा च दहित्वा च प्राणा
यामेन शुध्यति॥ न तेषां च शुभं किंचित्पापं वा शुभक
र्मणं॥ जलावगाहनं तेषां सदा शौचं विधीयते॥ प्रतिश्रु
तं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः॥ नयंतमनुगच्छेत
त्रिरात्रमशुचिर्भवेत्॥ त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समु
द्रगां॥ प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥ वि
न्निर्वत्य यदा शूद्रा उदकांतमुपस्थिताः॥ तदा पश्यंति ते वि

प्राहुरिति धर्मविदो विदुः॥ ७०॥ इति पाराशरे धर्मशास्त्रे सूतक
निर्णयो नाम द्वितीयोध्यायः॥ अतिमानादतिक्रोधात्स्नेहेद्व
द्वा यद्विवा सयात्॥ यःसाधीमन्नतो ब्रूते प्रतिरेषा विधीयते॥
पूयशोणितसंपूर्णे अंधे तमसि मज्जति॥ षष्टिर्वर्षस
हस्राणि नरकं पर्युपासते॥ यवस्य ६९ वोढारो यवाग्नि
प्रदायकः॥ सर्वे ते पापसंयुक्तास्तेषां वक्ष्यामि निष्कृतिं॥
विषोद्बंधनशस्त्रैस्तआत्मानं यस्तु घातयेत्॥ मृतो मेध्य
मेध्यद्रव्याज्योनकुसंस्कार २ मर्हति॥ गोभिर्हतं तथोद्
बद्धं ब्राह्मणेन तु घाति २ तं॥ संस्पृशंति च ये विप्रा वोढारश्चाग्नि
येतदा॥ अग्निदाता तथा चान्ये ये चान्ये पाशभेदकाः॥ तप्त
कृच्छ्रेण शुध्यंति पाराशरवचो यथा॥ त्र्यहमुष्णं पिबेदापस्त्र्यह

मुस्नं पयः पिबेत् ॥ त्र्यहमुस्नं घृतं पीत्वा वायुभक्षो दिनत्रयं ॥ षट्प
लं तु पिबेदापः त्रिपलं तु पयः पिबेत् ॥ पलमेकं पिबेत्सर्पितप्त
कृछ्रं प्रकीर्त्तितं ॥ गोविप्रचांडालहतं त्रिवर्ग्ये ह्यत्मघातने ॥
शृङ्गैः शृङ्गेण दग्धो वा नाशौचं नोदकं क्रियाः ॥ क्रमव्रण ना
स्थीनि चाहृत्य पयसा क्षालयेत्ततः ॥ दहेद्ब्र विधिवत्येषां
कुर्यात्पिंडोदकक्रिया ॥ अदुष्टां पतितां भार्यां यौवने यः परि १०
त्यजेत् ॥ स मृतो लभते स्त्रीणीत्वं वैधव्यं च पुनः पुनः ॥ सु
स्नाता याश्चस्था यायाः संनिधौ या न गच्छति ॥ पुरुषो बाल
हत्यायाः पापमाप्नोत्यसंशयं ॥ न तु स्नातु या भार्या भर्त्तारं
नोपतिष्ठति ॥ सा मृते नरकं यांति विधवा भर्तृवर्जयेत् ॥
दरिद्रं व्याधितं मूर्खं भर्त्तारं यावमन्यते ॥ सा मृता जाय १०

ते स्वानी शूकरी च पुनः पुनः ॥ भर्तृजीवनिया नारी उपो
ष्यव्रतचारिणी ॥ आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥
मृते भर्त्तरि या नारी उपोष्यव्रतचारिणी ॥ नरकादुद्धरेद्भ
र्तृ सा नारी स्वर्गगामिनी ॥ या न पश्यति भर्त्तारं उपोष्यव्र
तचारिणी ॥ सर्वतराश्च संगच्छे सा नारी नरकं व्रजेत् ॥ न
च स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषितं ॥ पतिशुश्रूषय
या तेन स्वर्गे महीयते ॥ यस्य पुत्रो गृहे नास्ति गोत्राज्जीवं
तां मात्रको ॥ तस्य च पुत्रिणी माता पिंडं दद्याद्धनं हरेत् ॥ परपू
र्वा स्त्रयः त्रान पिंडं नोदकं क्रिया ॥ कन्यायां दूर्वभर्त्तारो
धर्माधर्ममवाप्यते ॥ अन्यवा तहृतं बीजं यस्य क्षेत्रे प्ररो
हति ॥ क्षेत्रे भतित तद्बीजं न बीजं भागमर्हति ॥ २१ ॥ तद्वत्प

रस्त्रीया जातौ द्वौ सुतौ कुंडगोलकौ॥ जीवतः कुंडको नाम मृते
भर्त्तरि गोलकः॥ औरसक्षेत्रजश्चैव दत्तश्चैव सुत्रिकासुतः॥
दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत्॥ पितृव्यपुत्रस
पत्न्यः परनारीसुताश्च येत्॥ दाराग्निहोत्रधर्मेण न दोषः
परिविंदति॥ परिवित्तिः परिवेत्ता वपश्येनं परिविंदति॥
सर्वे ते नरकं यांति दातृयाचकपंचमः॥ द्वौ कृच्छ्रौ परिवेत्ता
ते कन्यायां कृच्छ्रमेव वा॥ कृच्छ्रांतिस्वो दाता च हता चांद्रा
यणं चरेत्॥ दादोग्निहोत्रसंयोगं कुरुते योग्रजे स्थितेन॥ परि
वेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः॥ नोदकेन च वाचा
च कन्यायां पतिरुच्यते॥ पाणीग्रहणसंस्कारनियतं
परिलंघयेत्॥ एतानि द्यानुविज्ञेया विद्वद्भिः सप्तमे

पदे॥ कुब्जवामनखंडेषु गद्गदेषु जडेषु च॥ जात्यंधे बधिरे
मूके न दोष परिविंदति॥ ज्येष्ठा भ्राता यदा तिष्ठें न धनं त
स्य विद्यते॥ अनुज्ञातस्तु कुर्वीत पाराशारवचो यथा॥ क्ली
बे देशांतरस्थे च पतिते ब्रजिते थवा॥ आराध्यान स्वयकै
व न दोषः परिवंदने॥ नष्टे मृते प्रवृंजीते क्लीबे च पतिते
पतौ॥ पंचस्वापत्सु नारीणां पतिरन्यो विधायते॥ मृते
भर्त्तरि या नारी ब्रह्मचर्ये व्यवस्थिता॥ सा मृता लभते स्व
र्गं यथा ते ब्रह्मचारिणं॥ तिस्रः कोट्योर्द्धकोटीश्च
यानि लोमानि मानुषे॥ तावत्कालं वसेत्स्वर्गे भर्त्तारं या
नुगच्छति॥ व्यालग्राही यथा सर्पं बलादुद्धरते बलात्॥ ए
वमुद्धृत्य सा नारी तेनैव सह मोदते॥ कुब्जवामनखंजा

त्यां क्लीबश्वित्रिणामपि॥ उंमत्तानांतथांमानां नार्धभागो
विधीयते॥ विधवायाच्चवेत्कन्यां निर्देषां भर्तृवर्जितां॥
तस्यावासोपि वेश्मश्च सस्लु इत्यावेव सर्वदा॥ अप्रियंवा
क्यं मदेवासो भोजनाछादनानि च॥ एतेन्योपि च दात
व्यं नार्धभागो विधीयते॥ ३९॥ इति पाराशरे धर्मशास्त्रे
तृतीयोध्यायः॥ वृकश्वानसृगालेन यदि दष्टस्तु ब्राह्म
णः॥ स्नात्वा जपेद्गायत्रीं पवित्रां वेदमातरं॥ गवांशृं
गोदके स्नात्वा न महानद्योस्तु संगमे॥ समुद्रदर्शना
द्वापि सर्पदंष्ट्र शुचिर्भवेत्॥ वेदविद्याव्रतस्नातं श्वा
न दष्टस्तु ब्राह्मणः॥ हिरण्मुदके स्नात्वा घृतं प्राश्य ११

तिनरुध्यांसोआनुजंघेन त्रिरात्रि॥ पादांगुल्यार्द्धं
न्नातं यज्ञपात्रं स्थितोन्यसेत्॥ शम्यत्रिशेविनिक्षि
पद्दरणीव पलेतथा॥ जुहूयाद्दक्षिहस्ते वामहस्ते तथो
पभृत्॥ स्कंधे उलूखलं दद्या। द्विंसे तु मुसलं ततः॥ उरे
नि यिप दषदं तंडुलाज्यतिलान्मुखे॥ श्रोत्रे च प्रोक्ष
णीं दद्यादाज्यस्थालीं च चक्षुषी॥ कर्णेनि मुखे प्राणे हि
रण्यसकलांतु क्षिपेत्॥ अग्निहोत्रोपकरणमत्रो
षं तत्र विन्यसेत्॥ न सो स्वर्गपिलोकाय दद्यादाज्या
हुतीसकृत्॥ दद्यात्पुत्रोथवा भ्राता अन्येवासकृद्ध
र्मिणः॥ यथादहनसंस्कारं तथाकार्यं विचक्षिणैः॥

इदत्वां तुविधिंकुर्यद्ब्रह्मलोकगतिर्ध्रुवं॥ येदहंति द्विजा
स्तांतु तेपियांति परांगतिं अन्यथाकुरुतेकर्मआत्मबुद्धि
प्रणोदितः॥ भवंत्यल्पायुषस्तेपि पतंति नरकेशुच॥ इति
पाराशरे धर्मशास्त्रे मृतसंस्कारेचचतुर्थोध्यायः॥
अतःपरंप्रवक्ष्यामि प्राणहत्यांसुनिष्कृति॥ पाराशरेतथा
प्रोक्तंमानवानांहितायवै॥ हंससारसक्रौंचानांचक्र
वाकोष्ठकुक्कुटं॥ मयूरमेवघातीच अहोरात्रेणशुध्य
ति॥ बलाकटिट्टिभानांच शुकपारावतानिच॥ आहि
नांचकघातीच शुध्यतेनक्तभोजनात्॥ वायसभास
कपोतानांसमीतितिरघातकः॥ अंतर्जलेउभेसंध्ये

विशुध्यति॥ सवतीतुशुनादष्ट त्रिरात्रमुपवासयेत्॥
घृतंसपावकंपीत्वाव्रतशेषंसमापयेत्॥ अव्रतीसव्रती
सव्रतीवापिशुनदष्टस्तुब्राह्मणः॥ प्रणिपाताद्भवेत्पू
तः विप्रैश्चक्षुनिरीक्षितः॥ श्वानघ्राणाबलीढस्यन
खैवलिखितस्यच॥ अद्भिःप्रक्षालनंप्रोक्तंमग्निनाचो
पकूलनं शुनाच ब्राह्मणीदष्टीजंबुकेणवृकेणवा॥ उदि
तंग्रासतक्षत्रे दृष्वासद्यःशुचिर्भवेत्॥ यदाब्राह्मणके
ग्रामेशुनादष्टस्तुब्राह्मणः॥ वृषंप्रदक्षिणीकृत्य घृतं
प्राश्यविशुध्यति॥ चांडलेश्वपचाकेन गोभिर्विप्रैर्हतो
यदि॥ आहिताग्निहतो विप्रो विषेणनिहतोपिवा॥ दहे

तं ब्राह्मणं प्रेतं लौकिकाग्निना मंत्रवर्जितं ॥ दग्ध्वास्थीनि पु
नर्ग्राह्य क्षीरैः प्रक्षालयेद्द्विजः ॥ पुनर्दहेत्स्वकाग्नौ वा स्व
मंत्रेण पृथक्पृथक् ॥ आहिताग्निर्मृतः कश्चित्प्रवासे का
लनोदितः ॥ देहे नाशे तु संप्राप्ते यस्याग्निर्वर्त्तते गृहे ॥
व्रताग्निहोत्रसंस्कारं श्रूयतां द्विजपुंगवा ॥ कृष्णाजी
नं समास्तीर्य कुशांश्च पुरुषाकृतिं ॥ षट्शतानि न्नातंचै
व पालाशस्य वृंतकाः ॥ चत्वारिंशच्छिरे दद्यात्तु षष्ठि
कंठे विनिर्दिशेत् ॥ बाहुल्यां च शतं दद्यादंगुल्यां तु दशै
व च ॥ शतं तस्योरसि दद्याद्विंशं नाभ्युदरे तथा ॥ अ
ष्टौ वृषणयोर्दद्यात्पंच मेढ्रे च विन्यसेत् ॥ सप्तविंश

```
[OrderDescription]
,CREATED=26.08.19 15:17
,TRANSFERRED=2019/08/26 at 15:24:57
,PAGES=15
,TYPE=STD
,NAME=S0001541
,Book Name=M-793-AACHAAR PRASHANSAVIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,
```